✧˖°*❋ ❋*°˖✧

# દુર્ગા કવચમ્

# Durga Kavacham
## in **gujarati**

✧˖°*❋ ❋*°˖✧

# ॥ દુર્ગા કવચમ્ ॥

**ઈશ્વર ઉવાચ ।**

શૃણુ દેવિ પ્રવક્ષ્યામિ કવચં સર્વસિદ્ધિદમ્ ।
પઠિત્વા પાઠયિત્વા ચ નરો મુચ્યેત સંકટાત્ ॥ 1 ॥

અજ્ઞાત્વા કવચં દેવિ દુર્ગામંત્રં ચ યો જપેત્ ।
ન ચાપ્નોતિ ફલં તસ્ય પરં ચ નરકં વ્રજેત્ ॥ 2 ॥

ઉમાદેવી શિરઃ પાતુ લલાટે શૂલધારિણી ।
ચક્ષુષી ખેચરી પાતુ કર્ણૌ ચત્વરવાસિની ॥ 3 ॥

સુગંધા નાસિકં પાતુ વદનં સર્વધારિણી ।
જિહ્વાં ચ ચંડિકાદેવી ગ્રીવાં સૌભદ્રિકા તથા ॥ 4 ॥

અશોકવાસિની ચેતો દ્વૌ બાહૂ વજ્રધારિણી ।
હૃદયં લલિતાદેવી ઉદરં સિંહવાહિની ॥ 5 ॥

કટિં ભગવતી દેવી દ્વાવૂરૂ વિંધ્યવાસિની ।
મહાબલા ચ જંઘે દ્વે પાદૌ ભૂતલવાસિની ॥ 6 ॥

એવં સ્થિતાऽસિ દેવિ ત્વં ત્રૈલોક્યે રક્ષણાત્મિકા ।
રક્ષ માં સર્વગાત્રેષુ દુર્ગે દેવિ નમોऽસ્તુ તે ॥ 7 ॥

✧˟┈┈°*❋ ❋*°┈┈˟✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net